Archbishop, *s.* धर्म्माध्यक्षाणां मध्ये प्रधानो or मुख्यो धर्म्माध्यक्षः.

Archdeacon, *s.* (The bishop's vicegerent) धर्म्माध्यक्षसहायः, धर्म्माध्यक्षोपकारकः.

Archaiology or archæology, *s.* प्राक्कालीनव्यवहारविषयं वाक्यं, पुरातनशास्त्रं.

Arched, *p. p.* मण्डलीकृतः -ता -तं, गोलीकृतः -ता -तं, तोरणाकारः -रा -रं, कुञ्चितः -ता -तं.

Archer, *s.* धनुर्धरः, धन्वी *m.* (न्), धन्वा *m.* (न्), धनुष्मान् *m.* (-त्), धानुष्कः, धनुर्धारी *m.* (न्), इष्वासः, इषुधरः, काण्डीरः, निषङ्गी *m.*, अस्त्री *m.*

Archery, *s.* धनुर्विद्या, शराभ्यासः, उपासनं, शराघातः, बाणमोक्षणं.—(Skilled in) कृतहस्तः, सुप्रयोगविशिखः, कृतपुङ्खः.

Archetype, *s.* मूलं, मूलमूर्त्तिः *f.*, आदर्शः, सूक्ष्मशरीरं.

Architect, *s.* स्थपतिः *m.*, गृहादिनिर्म्माणविद्याज्ञः, गृहनिर्म्माणाध्यक्षः, निर्म्माता *m.* (तृ).

Architectural, *a.* निर्म्माणविद्यासम्बन्धी -न्धिनी -न्धि (न्).

Architecture, *s.* निर्म्माणविद्या, निर्म्माणशिल्पं, गृहादिनिर्म्माणशिल्पं.

Architrave, *s.* गृहस्य यो भागः स्तम्भाग्रे अवलम्बते or निवेश्यते.

Archives, *s.* प्राक्कालीनग्रन्थरक्षागारं.—(Ancient records) इतिहासः, पुरावृत्तं

Archness, *s.* विदग्धता, वैदग्ध्यं, रसित्वं.

Archwise, *adv.* तोरणरूपेण, अर्द्धमण्डलाकारेण, तोरणवत्; धनुराकारेण.

Arctic, *a.* उत्तरः -रा -रं, उदीचीनः -ना -नं, उत्तरकेन्द्रीयः -या -यं, चित्रशिखण्ड्यधःस्थितो भूगोलभागः.

Ardency, *s.* उत्तापः, उत्साहः, उग्रता, व्यग्रता, कौतूहलं, उत्सुकता.

Ardent, *a.* (Hot) उत्तप्तः -प्ता -प्तं, प्रचण्डः -ण्डा -ण्डं.—(Eager) कुतूहली -लिनी -लि (न्), उत्सुकः -का -कं, अतीक्ष्णः -क्ष्णा -क्ष्णं, व्यग्रः -ग्रा -ग्रं, उत्साही -हिनी -हि (न्).—(Affectionate) अनुरागी -गिणी -गि (न्).

Ardently, *adv.* उत्तापेन, कौतूहलेन, औत्सुक्येन, सानुरागं.

Ardour, *s.* उत्तापः, आसक्तिः *f.*, उग्रता, व्यग्रता, कौतूहलं, औत्सुक्यं, उत्साहः.—(Of affection) अनुरागः.

Arduous, *a.* (Lofty) उच्चः -च्चा -च्चं, प्रांशुः -शुः -शु, आरोहणदुर्गम्यः -म्या -म्यं.—(Difficult) दुष्करः -रा -रं, सुदुष्करः -रा -रं, अतिदुष्करः -रा -रं, कठिनः -ना -नं, दुर्गम्यः -म्या -म्यं, दुःसाध्यः -ध्या -ध्यं, दुश्चरः -रा -रं.

Arduousness, *s.* उच्चता, उत्तुङ्गता.—(Difficulty) कठिनता, काठिन्यं.

Area, *s.* अङ्गणं, प्राङ्गणं, अभ्यन्तरस्थानं.

Arena, *s.* रङ्गः, रङ्गभूमिः *f.*, मल्लभूः, अक्षवाटः.

Argent, *a.* रूप्यः -प्या -प्यं, रौप्यः -प्यी -प्यं, राजतः -ती -तं.

Argillous, *a.* मृण्मयः -यी -यं, मार्त्तिकः -की -कं, चिक्कणमृत्तिकामयः -यी -यं.

To argue, *v. n.* (To reason) विचर् in caus. (-चारयति -यितुं), तर्क् (c. 10. तर्कयति -यितुं), वितर्क्, विवेचनं कृ.—(To dispute) विवद् (c. 1. -वदते -वदितुं), वादानुवादं or उत्तरप्रत्युत्तरं कृ.

To argue, *v. a.* (To prove by argument) प्रमाण्, (nom. प्रमाणयति -यितुं), प्रमाणीकृ, प्रमाणेन or तर्केण or विचारेण सिद्धीकृ; सूच् (c. 10. सूचयति -यितुं).—(To charge with, as a crime) दोषारोपं कृ, अपवद् (c. 1. -वदति -वदितुं), अधिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

Arguer, *s.* तर्की *m.* (न्), विवादी *m.* (न्), विचारकः, प्रतिवादी *m.* (न्), न्यायी *m.* (न्).

Argument, *s.* (A reason stated) पक्षः, प्रमाणं, हेतुः *m.*, कारणं, वितर्कः, न्यायः; 'a false argument,' पक्षाभासः; 'a different side of the argument,' पक्षान्तरं.—(Controversy) वादानुवादः, वादयुद्धं, वाक्कलहं, विचारः, वितर्कः, विवादः, वितण्डा.—(The subject of any work) विषयः.—(Table of contents) अनुक्रमणिका, निर्घण्टः.

Argumentation, *s.* वितर्कणं, विचारणं, न्यायः.

Argumentative, *a.* (Consisting of argument) तार्किकः -की -कं, वितर्की -र्किणी -र्कि (न्), विवादी -दिनी -दि (न्), न्यायी -यिनी -यि (न्), विचारी -रिणी -रि (न्).—(Disposed to controversy) विवादशीलः -ला -लं, विवादार्थी -र्थिनी -र्थि (न्), विवादप्रियः -या -यं.

Argumentatively, *adv.* सवितर्कं, वादानुवादपूर्व्वकं, वितर्कपूर्व्वकं, न्यायवत्.

Arid, *a.* शुष्कः -ष्का -ष्कं, शोषितः -ता -तं, परिशुष्कः -ष्का -ष्कं; 'arid soil,' मरुः *m.*, मरुस्थली, धन्वा *m.* (न्).

Aridity, *s.* शुष्कता, -त्वं, शोषः, शोषणं, परिशोषः

Aright, *adv.* युक्तं, ऋतं, यथातथं, यथोचितं, यथायोग्यं, सम्यक्, यथार्हं.

To arise, *v. n.* (To stand up) उत्था for उत्स्था (c. 1. -तिष्ठति -ते -थातुं).—(To have origin) उत्पद् (c. 4. -पद्यते -पत्तुं), समुत्पद्; उच्चर् (c. 1. -चरति -चरितुं), उदि (c. 1. -अयति -एतुं), अभ्युदि, समुदि; प्रभू (c. 1. -भवति -भवितुं), सम्भू, आविर्भू, प्रादुर्भू; प्रवृत् (c. 1. -वर्त्तते -वर्त्तितुं), प्रसृ (c. 1. -सरति -सर्त्तुं), उद्भा (c. 2. -भाति -भातुं), निर्भा; आत्मानं दृश् in caus. (दर्शयति -यितुं), जन् (c. 4. जायते जनितुं), अभिजन्, उपजन्, सञ्जन्.—(From death) प्रतिसञ्जन्, समुत्था.

Arisen, *p. p.* उत्थितः -ता -तं, सञ्जातः -ता -तं, जातः -ता -तं, जनितः -ता -तं, उत्पन्नः -न्ना -न्नं, समुत्पन्नः -न्ना -न्नं, विनिःसृतः -ता -तं, जन्यः -न्या -न्यं.

Aristocracy, *s.* (A form of government) कुलीनजनाधिष्ठितं राज्यं, कुलीनवर्गप्रमुखं राज्यं, कुलीनवर्गप्रभुत्वं.—(The persons of whom it is composed) कुलीनजनाः, कुलीनवर्गः.

Aristocratical, *a.* कुलीनः -ना -नं, कुलीनकः -का -कं, कौलेयः -यी -यं, कुलीनवर्गयोग्यः -ग्या -ग्यं, उत्कृष्टः -ष्टा -ष्टं.

Aristocratically, *adv.* कुलीनजनवत्, राजन्यवत्, कुलीनकप्रकारेण.

Arithmetic, *s.* गणनाविद्या, गणितं, पाटीगणितं, अङ्कविद्या, परिपाटिः *f.* -टी परिकर्म्म *n.* (न्); 'the eight rules of arithmetic,' परिकर्म्माष्टक.

Arithmetical, *a.* गणनाविद्यानुरूपः -पा -पं, अङ्कविद्यानुसारी -रिणी -रि (न्).

Arithmetician, *s.* गणनाविद्याज्ञः, गणनाशास्त्रपण्डितः, अङ्कविद्याज्ञः, गणकः.

Ark, *s.* (A vessel, ship) नौः, नौका, पोतः, तरणी, वृहन्नौका.—(A chest) आधारः, कोषः, पेटिका, पेटः -टा -टी.

Arm, *s.* (Of the body) बाहुः *m. f.*, भुजः or -जा *f.*, दोषा *f.*, दोः *m.* (-स्), प्रवेष्टः.—(Of a tree) शाखा, उपशाखा.—(Of the sea) समुद्रवङ्कः.—(Of a river) वक्रं, वङ्कः, नदीवङ्कः, नदीवक्रं, पुटभेदः.—(Power, might) बलं, शक्तिः *f.*; 'a dominion acquired by one's own arm,' स्वभुजोपार्ज्जितं राज्यं—(The upper arm) प्रगण्डः.

To arm, *v. a.* सन्नह् (c. 4. -नह्यति -नद्धुं), सज्जीकृ, अस्त्रैः or शस्त्रैः सज्जीकृ, or युज् in caus. (योजयति -यितुं), or समायुज्.—(To arm one's self, put on one's arms) नह् (c. 4. नह्यते नद्धुं), सन्नह्.—(To put on armour) वर्म्म् (nom. वर्म्मयति -यितुं or संवर्म्मयति).

Armada, *s.* वृहन्नौकासमूहः, समुद्रयुद्धाय सज्जीकृतो वृहन्नौकासमूहः.

Armadillo, *s.* घुणः, कवचाकारचर्म्मधारी विलवासी क्षुद्रजन्तुः.

Armament, *s.* सैनिकः, युद्धाय सज्जीकृतं बलं, योद्धृसज्जनं.

Armed, *p. p.* सज्जः -ज्जा -ज्जं, वर्म्मितः -ता -तं, सन्नद्धः -द्धा -द्धं, अभिसन्नद्धः -द्धा -द्धं, सायुधः -धा -धं, कृतास्त्रः -स्त्रा -स्त्रं, शस्त्री -स्त्रिणी -स्त्रि (न्).—(Having a weapon in the hand) शस्त्रपाणिः -णिः -णि.

Arm-hole, *s.* कक्षः, बाहुमूलं, भुजकोटरः, कक्षस्थानं, दोर्मूलं.

Armistice, *s.* किञ्चित्कालपर्य्यन्तं युद्धनिवर्त्तनं, सन्धिः *m.*, क्षमा.

Armless, *a.* (Without an arm) अभुजः -जा -जं.—(Without weapons) अस्त्रहीनः -ना -नं, अशस्त्रः -स्त्रा -स्त्रं.